Sem 5th 8/12/23 DSE + QE

'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 5th Semester Examination, 2023

## DSE-P2-SANSKRIT (502)

Time Allotted: 2 Hours    Full Marks: 60

*The figures in the margin indicate full marks.*

**The question paper contains DSE-502A and DSE-502B. Candidates are required to answer any *one* from the two papers and they should mention it clearly on the Answer Book.**

**All answer should be written in Sanskrit with Devanagari.**

Maynaguri College Library

## DSE-502A

### विभाग-क

1. ***एकस्य*** उत्तरं लिखत — 12×1 = 12

(क) भारतीयधर्मशास्त्रेषु प्रतिफलितम् आश्रमधर्मम् आलोचयत।

(ख) भारतीयधर्मशास्त्रपरम्परायां मनुसंहितायाः स्थानं महत्त्वं चोपस्थापयत।

2. ***एकस्य*** संक्षिप्ता टीका लेखनीया — 6×1 = 6

वैश्यस्य धर्मः, मोक्षधर्मः।

3. ***षण्णां*** प्रश्नानाम् उत्तरं लिखत — 1×6 = 6

(क) का नाम त्रयी ?

(ख) प्राचीन-भारतीयसंस्कृतौ कति वर्णाः ? के च ते ?

(ग) भारतीयधर्मशास्त्राणि कस्मिन् वेदाङ्गे अन्तर्भवन्ति ?

(घ) के पञ्च महायज्ञाः ?

(ङ) मनुसंहितायाम् कति अध्यायाः सन्ति ?

(च) वङ्गप्रदेशस्य द्वयोः धर्मशास्त्रकारयोः नामनी लिखत।

(छ) भारतीयदर्शनसंप्रदायानाम् आस्तिक-नास्तिक-विभाजने को हेतुः ?

(ज) द्वयोः वेदभाष्यकारयोः नामनी लिखत।

### विभाग-ख

4. ***एकः*** प्रश्नः समाधेयः — 12×1 = 12

(क) भारतीयधर्मशास्त्रानुसारं विवाहसंस्कारः आलोच्यताम्।

(ख) चतुर्वर्गं पुरुषार्थमाश्रित्य प्रबन्धमेकं लिखत।

5. ***द्वयोः*** टिप्पणी कार्या। 3×2 = 6

चुडाकरणम्, स्वाध्यायः, कामः।

### विभाग-ग

6. *एकस्य* प्रश्नस्य उत्तरं लिखत — 12×1 = 12

(क) भारतीयशास्त्रानुसारं क्षत्रियाणां स्वधर्मं सविशदमालोचयत।

(ख) भारतीयशास्त्रानुसारतः ब्रह्मचारिणां कर्तव्यं विस्तरेण आलोचयत।

7. *द्वयोः* टिप्पणी कार्या — 3×2 = 6

सदाचारः, गार्हस्थ्यधर्मः, वाणप्रस्थाश्रमधर्मः।

## DSE-502B

### विभाग-क

1. *कस्यचिदेकस्य* उत्तरं लिखत — 12×1 = 12

(क) मम्मटोक्तदिशा काव्यप्रयोजनमालोचयत।

(ख) मम्मटानुसारं काव्यस्वरूपमालोचयत।

2. *द्वयोः* व्याख्या कार्या — 6×2 = 12

(क) नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति॥

(ख) इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः।

(ग) शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥

3. संक्षिप्तोत्तरं प्रदेयम् (*द्वयोः*) — 3×2 = 6

(क) काव्यप्रकाशे कति उल्लासाः सन्ति ? तत्र प्रथमोल्लासस्य नाम किम् ?

(ख) मम्मटानुसारम् अवरकाव्यस्य किं लक्षणम् ?

(ग) 'गुणीभूतव्यङ्ग्य'— इति शब्दस्य कोऽर्थः काव्यप्रकाशे ?

### विभाग-ख

4. *कस्यचिदेकस्य* प्रश्नस्य उत्तरं लिखत — 12×1 = 12

(क) संस्कृतालंकारशास्त्रेषु ध्वनिसंप्रदायमालोचयत।

(ख) संस्कृतालंकारशास्त्रेषु के तावद् रसवादिनः ? तेषां विषये प्रबन्धमेकं लिखत।

5. टीका लेखनीया (*द्वयोः*) — 6×2 = 12

दण्डी, वामनः, वक्रोक्तिजीवितम्, राजशेखरः।

6. *द्वयोः* संक्षिप्तोत्तरं लिखत — 3×2 = 6

(क) अलंकारशब्दस्य का व्युत्पत्तिः ?

(ख) विश्वानाथस्य काव्यलक्षणं किम् ?

(ग) संस्कृतालंकारशास्त्रेषु गुणप्रस्थाने के तावद् आचार्याः ?

——×——

Maynaguri College Library